कुं.नं. ७२

स्तोत्र

# संस्कृत

६९८। स्तो.
९२९

# ॥ ब्रम्हस्तुतिः ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्रीगणेशायनमः ब्रह्मस्तुतिः ॥ ब्रह्मोवाच ॥ वंदेरामंविष्णुमशेषस्थितिहेतुं
त्वामध्यात्मज्ञानिभिरंतर्हृदिभाव्यम् ॥ हेयाहेयंद्वंद्वविहीनंपरमेकंसत्ता
मात्रंसर्वहृदिस्थंदृशिरूपम् ॥१॥ प्राणापानौनिश्चयबुद्ध्याहृदिरुध्वा
छित्वासर्वंसंशयबंधंविषयौघान् ॥ पश्यंतीशंयंगतमोहायतयस्तंवं
देरामंरत्नकिरिटंरविभासम् ॥ मायातीतंमाधवमाद्यंजगदादिंमा
नातीतंमोहविनाशंमुनिवंद्यम् ॥ योगिध्येयंयोगविधानंपरिपूर्णंवंदे
रामंरंजितलोकंरमणीयम् ॥३॥ भावाभावप्रत्ययहीनंभवमुख्यैर्भोगा
सक्तैरर्चितपादांबुजयुग्मम् ॥ नित्यंशुद्धंबुद्धमनंतंप्रणवाख्यंवंदेरामं
वीरमशेषासुरदावम् ॥४॥ त्वंमेनाथोनाथितकार्याखिलकारीमाना

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

ध
(2) तीतोमावरूपोखिलधारी ।। भक्त्यागम्यो भावितरूपो भवहारी योगाभ्यासे
र्भावितचेतःसहचारी ।।५।। त्वामच्युतं लोककृतीनां परमीशं लोकानां नो
लौकिकमानैरधिगम्यम् ।। भक्तिश्रद्धाभावसमेतै भजनीयं वंदे रामं
सुंदरमिंदीवरनीलम् ।।६।। कोवा ज्ञातुं त्वामतिमानं गतमानं मानासक्तो
माधवशक्तो मुनिमान्यम् ।। वृंदारण्ये वंदितवृंदारकवृंदं वंदे रामं भवमुख
वंद्यं सुखकंदम् ।।७।। नानाशास्त्रैर्वेदकदंबैः प्रतिपाद्यं नित्यानंदं निर्वि
षयज्ञानमनादिम् ।। मत्सेवार्थं मानुषभावं प्रतिपन्नं वंदे रामं मरकत
वर्णमधुरेशम् ।।८।। श्रद्धायुक्तो यः पठतीमं स्तवमाद्यं ब्राह्मं ब्रह्मज्ञानविधानं
भुविमर्त्यः रामं श्यामं कामितकामप्रदमीशं ध्यात्वाध्याता पातकजालैः विगतः स्यात् ।।९।।
।।इती श्रीब्रह्मस्तुती समाप्तः

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com